# श्री प्रज्ञाविवर्धन स्तोत्र

श्री गणेशाय नमः

अस्य श्री प्रज्ञाविवर्धन स्तोत्र मंत्रस्य सनत्कुमार ऋषी स्वामी कार्तिकेयो देवता अनुष्टुप छंद: मम सकल विद्यासिध्यर्थं जपे विनियोग:

||श्री स्कंद उवाच||

योगीश्वरो महासेन कार्तिकेयोग्निनंदन|
स्कंद:कुमार सेनानी स्वामी शंकर संभव:||1||

गांगेयस्ताम्रचुडश्च ब्रम्हचारी शिखीध्वज|
तारकारीरुमापुत्र क्रौञ्चारिश्च षडाननः||2||

शब्दब्रम्ह समुद्रश्च सिद्ध सारस्वतो गुहः|
सनत्कुमारो भगवान् भोगमोक्षफलप्रदः||3||

शरजन्मा गणाधीश पूर्वजो मुक्तीमार्गकृत्|
सर्वागम प्रणेता च वांछितार्थ प्रदर्शनः||4||

अष्टाविंशति नामानि मदीयानिती यः पठेत्|
प्रत्युषम् श्रद्धया युक्तो मुको वाचस्पतीर्भवेत्||5||

महामंत्रमया निती ममनामानु कीर्तनम्|
महाप्रज्ञामवाप्नोति नात्र कार्याविचारणा||6||

इति श्री रूद्रयामले प्रज्ञाविवर्धनाख्याम् श्रीमद् कार्तिकेय स्तोत्रम् संपूर्णम्

eAstroHelp